IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# अभिज्ञानशाकुन्तले औचित्यनिबन्धनम्

**कोमला कुट्टिप्पुरत्त्**

**सहायकाचार्या**

**कालिक्कट् आदर्शसंस्कृतविद्यापीठम्**

काव्यस्य आत्मतत्वविचारेऔचित्यसंप्रदायस्य परमप्राधान्यमस्ति।औचित्यसंप्रदायप्रवर्तकःभवति क्षेमेन्द्रः। स्वस्य "औचित्यविचारचर्चा"नामक ग्रन्थे क्षेमेन्द्रेण औचित्यम् काव्यस्य आत्मतत्त्वमिति व्यवस्थापितम्। यथा-

"औचित्यस्य चमत्कारकारिणश्चारुचर्वणे

रसजीवितभूतस्य विचारं कुरुतेऽधुना" १

उचितस्य भावः औचित्यमिति कथ्यते।अस्य मते औचित्यमिदं न केवलं काव्ये, लोकेऽपि सर्वत्र व्याप्तं वर्तते। काव्यधर्माणां गुणालङ्काररीत्यादीनां सार्थकत्वम् औचित्यदीक्षया प्राप्नोति।तेषां सौन्दर्याधायकत्वम् औचित्यं विना न सम्भवति। तदुक्तम् आचार्यैः-

"अलङ्कारास्त्वलङ्काराः गुणाः एव गुणाः सदा

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।। "२ इति।

औचित्यं विना काव्यं सर्वदा परिहास्यं भवेत्।औचित्यविचारचर्चायां क्षेमेन्द्रः पद-वाक्य-प्रबन्धादि सप्तविंशति औचित्यमार्गान् निर्द्धिशति। काव्ये औचित्यस्य प्राधान्यं अन्यैःआलङ्कारिकैःअपि अङ्गीकृतम्। यथा-

"लोकप्रमाणं हि कर्तव्यं नाट्ययोक्तृभिः"।३

"वयोऽनुरूपःप्रथमस्तुवेशो,वेशोऽनुरूपस्तुगतिप्रचारः

गतिप्रचारानुगतं च पाठ्यं पाठ्यानूरूपेऽभिनयश्च कार्यः।।" ४

इत्यादिना भरतेन नाट्यशास्त्रे औचित्यस्य प्राधान्यं निरूपितम्।ध्वनिवादी आचार्यः आनन्दवर्धनः काव्ये औचित्यं परमप्रधानमिति मनुते। ध्वन्यालोके बहुशः अस्य प्राधान्यमभिधीयते। यथा-

"तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः"।५

"अनौचित्यादृते नान्यतद्रसभङ्गस्य कारणम्" ।।६

“विभावाभावानुभावसञ्चार्यौचित्यचारुणःविधि : कथाशरीरस्य”७

"रसाध्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः

औचित्यवान् यस्ताःएताःवृत्तयोःद्विविधाः स्मृताः।। "८

कुन्तकेन-

“वृत्यौचित्यमनोहारि रसानां परिपोषणम्।"९

महिमभट्टेन -

"एतस्य(अनौचित्यस्य)विवक्षितरसादिप्रतीतिविघ्नविधायित्वं नामसामान्यलक्षणम्”१०

इत्यादिना काव्ये औचित्यस्य अपेक्षिता उत्घोषिता।

काव्ये औचित्यसन्निवेशःयथा रसपुष्टिं विदधातीत्यस्य निदर्शनरूपाः भवन्ति कालिदासस्य काव्यग्रन्थाः।तेषु ग्रन्थेषु अभिज्ञानशाकुन्तलस्य औचित्यनिबन्धनमधिकृत्य अत्र किञ्चित् संसूच्यते।

' काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ' इति प्रथा अस्ति। शकुन्तलादुष्यन्तप्रणयकथासम्बद्धमिदं नाटकं कालिदासस्य प्रौढा कृतिःभवति। इतिहासप्रसिद्धं शकुन्तलोपाख्यानमाधारीकृत्य विरचितं नाटकं भवति अभिज्ञानशाकुन्तलम्। 'अभिज्ञायतेऽनेनेति अभिज्ञानम्' । ' अभिज्ञानेन स्मृतं शाकुन्तलं शकुन्तलाविषयकवृत्तान्तं यस्मिन् तत् अभिज्ञानशाकुन्तलम् ’ इत्यादि व्युत्पत्तिद्वारा अस्य रूपकस्य शीर्षकं इतिवृत्तानुसारी भवति।अस्मिन् शृङ्गारः अङ्गीरसरूपेण अन्ये रसाःअङ्गरूपेण च वर्तन्ते। अभिज्ञानशाकुन्तले प्रथमाङ्कादारभ्य सप्तमोऽङ्कपर्यन्तं कविःऔचित्यदीक्षांअनुवर्तते।" जलाग्निसूर्यचन्द्रगगनधरापवनाख्याभिःअष्टाभिःप्रत्यक्षाभिःमूर्तिभिः युक्तः महेश्वरः सामाजिकान् पातु ” इत्यनेन आशीर्वादात्मक मङ्गलाचरणे शकुन्तलायाः सौन्दर्यातिशयस्य, गर्भावस्थायाः, कण्वमहर्षेः,सखीनां, दुष्यन्तस्य राष्ट्रगमनस्य तत्तिरोधानस्य च,एवं शकुन्तलायाः स्वराज्ये प्रत्यागमनादि बहूनां नाटकान्तर्गतविषयाणां सूचना औचित्यानुसारमस्तीति व्याख्याकाराणां मतम्। अस्मिन् रूपके वृत्तालङ्काराणां सन्निवेशोऽपि अङ्गीरसपरिपोषकरूपेण दृश्यते।अलङ्काराःकाव्यस्य महत्वपूर्णाऽङ्गानि वर्तन्ते। अलङ्कृतिरलङ्कारः।अलङ्कारेषु सादृश्यमूलकाऽलङ्काराणां प्राधान्यं कालिदासकाव्येषु दृश्यते।अत्र अलङ्काराः न केवलं सौन्दर्याधायकधर्माः परं रसपोषकधर्माः भवन्ति। कालिदासस्य अलङ्काराणां औचित्यनिबन्धनम् अन्यः कोऽपि न कृतवान्।अलङ्कारचित्रणे कालिदासःअननुकरणीयः च भवति। अस्य उपमानानां सौन्दर्यातिशयत्वम् अलौकिकत्वम् च अन्यत्र कुत्राऽपि द्रष्टुं न शक्यते। अत्र छन्दोप्रयोगश्च भावाभिव्यञ्जकःभवति। शाकुन्तले वैदर्भीरीतेः प्रसादगुणस्य च सन्निवेशःसहृदयहृदयानुसारी भवति।

नाटकेऽस्मिन् मङ्गलाचरणान्तरं सूत्रधारः नट्या सह रङ्गं प्रविश्य ग्रीष्मऋतुवर्णनद्वारा सङ्गीतसंवादम् अनुभवति। नटीसूत्रधारयोः भाषणं ग्रीष्मकालस्य मनोहरवर्णनं च इतिवृत्तयोजनानुरूपं कृतम्। तदुक्तं सूत्रधारेण–

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः

एषः राजेव दुष्यन्तः सारङ्गेणातिरंहसा"।।१

इति।

पुनः मृगयाविनोदे व्यापृतस्य राज्ञः वर्णने –

"कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके

मृगानुसारिणं साक्षात् पश्यामीति पिनाकिनम्"।।२

इत्यादिषु श्लोकेषु 'पिनाकी' इति विशेषणमपि सन्दर्भोचितं भवति। पिनाकीत्यनेन शिवस्य भीषणरूपस्य स्मृतिः उपजायते।पिनाकं नाम लक्ष्यभेदी धनुः च भवति।अनेन मृगमनुसरतः राज्ञः दृढनिश्चयः च अभिव्यज्यते।भयभीतस्य मृगस्य सूक्ष्मचित्रणं भवति–

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः

पश्चार्धेनप्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।

दर्भैरर्धावलीढैःश्रमविवृतमुखभ्रंशिभिःकीर्णवर्त्मा

पश्योदग्रप्लुतत्वाद्वियतिबहुतरं स्तोकमुर्व्यांप्रयाति।।" ३

इत्यादि श्लोकाः। निष्कलङ्कतायाम् अधर्मस्य सन्निवेशःअत्र दृश्यते।भयानकरसप्रकाशकः भवति अयं श्लोकः।"आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः"।४ इत्यादि नेपथ्यवचनमपि कथाप्रवाहे औचित्यानुसारी भवति।

"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तकरणप्रवृत्तयः"५

अपि च शकुन्तलामुद्दिश्य प्रियंवदां प्रति–

"वैखानसं किमनयाव्रतमाप्रदानाद्–

व्यापाररोधी मदनस्य निषेवितव्यं"६

इत्यादि वाक्यानि प्रणयातुरस्यापि चन्द्रवंशराज्ञः परिपक्वतां कुलीनतां च अभिव्यनक्ति।

कालिदासस्य नायिकासु प्रथमगणनीया भवति शकून्तला। " मानुषीषु कथं नु स्यादस्यरूपस्यसम्भवः , न प्रभातरलं ज्योतिरुदेति वसुधातलात्"।।७ इत्यादिचिन्तया तस्याःअलौकिकसौन्दर्यातिशयःतत्रतत्र कविनाप्रदर्शितः। तादृशचिन्तायाःऔचित्यानुसारी भवति–

" अनाघ्रातंपुष्पंकिसलयमलूनंकररुहै–

रनाविद्धं रत्नं मधु नवमनास्वादितम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं

न जाने भोक्तारं कमिह समुपस्थितिः विधिः।।"

८ इत्यादि श्लोकाः।

एवंमुनिकन्यायाःप्रणयनिवेदनमपिऔचित्यानुसारीभवति। यथा-

"वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे
कामं न तिष्ठति मदाननसम्मुखीना
भूयिष्ठमन्यविषयाः न तु दृष्टिरस्याः।।" ९

उन्नमितैकभ्रूलतमाननमस्याःपदानि रचयन्त्याः
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन"।।१० इत्यादिना अस्याःप्रणयाभिलाषं प्रदर्शितम्। प्रणयातुरस्य राज्ञःप्रणयविह्वलता अस्य राजोचितगाम्भीर्यं च औचित्यानुसारं मिलित्वा चित्रितः। धीरोदात्तनायकस्य दुष्यन्तस्य क्षत्रियोचितव्यवहारःश्रद्धेयः भवति।यथा-

"सायन्तने सवनकर्मणि सम्प्रवृत्ते
वेदीं हुताशनवतीं परितः प्रयस्ताः।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानाम् "।।११ इत्यादिषु सन्दर्भेषु अस्य धर्मसंरक्षणव्यग्रता प्रदर्शिता।

तृतीयेअङ्के शकुन्तलादुष्यन्तयोःसमागमवृत्तान्तवर्णनं कामिनः विवेकशून्यतायाः औचित्यानुसारमेव। गान्धर्वविवाहवृत्तान्तःतु नायिकानायकयोःचापल्याच्छादनार्थमिति वक्तुं शक्यते।अनेन सम्भोगशृङ्गारःपरिपुष्टतां प्राप्नोति।

अभिज्ञानशाकुन्तलेपरमप्राधान्यमावहतिचतुर्थोऽङ्कः।कालिदासस्य कविप्रतिभायाः,प्रकृतिप्रेम्णः,लौकिकज्ञानस्य च निदर्शनरूपेण परिलसति चतुर्थोऽङ्कः । अस्मिन्नङ्के प्रबन्धौचित्यरूपेण समावेशितः शापवृत्तान्तः धीरोदात्तनायकस्य दुष्यन्तस्य चरित्रस्य न्यूनतां परिहरति।अन्यथा चन्द्रवंशस्यापि कलङ्कः भवेत्। चतुर्थेऽङ्के लौकिकताऽलौकिकतयोः मानवप्रकृत्योः च विलक्षणं समन्वयोऽस्ति। शकुन्तलायाः भर्तुगृहप्रस्थानवेलायां समस्तवनभुवःवैकारिकचित्रणं कवेःप्रतिभायाःअनन्यसाधारणतां सूचयति। अत्र कविना मनुष्यजगत्प्रकृत्योःसमरसता प्रदर्शिता।वनदेवतायाःअलङ्करणसामग्रीप्रदानं,दीर्घापाङ्गस्य मार्गानुसरणादयः च कथाघटनायां औचित्यपूर्णं भवति।'वनौकसोऽपि वयं लौकिकज्ञाःएव ' इति कण्वस्य उद्घोषणा अन्वर्था भवति। तदनुसारमेव दुष्यन्तं प्रति-

"अस्मान् साधुविचिन्त्य संयमधनानुच्चैःकुलं चात्मनः
त्वय्यस्य कथमप्यबान्धवकृतांस्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्यास्त्वया
भाग्यायत्तमतःपरं न खलु वाच्यं ततद्वधूबन्धुभि.।।१२

इत्यादि वाक्यानि।

एवं शकुन्तलां प्रति- "शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने

भर्तुविप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।

भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी

यान्त्येवं गृहिणी पदं युवयोः वामाः कुलस्याधयः।।"१३ इत्यादि उपदेशाः न केवलं शकुन्तलां प्रति परं लोकजीवितनिरतानां स्त्रीणामपि मार्गदर्शकरूपेण भविष्यन्ति। शकुन्तलायाः प्रस्थानवेलायां-" "यास्यत्यध्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया

कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।

वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः

पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।।१४ - इत्यादिषु कण्वोक्तिषु मुनेःहृदयवेदना लौकिकतां प्राप्नोति। शकुन्तलां प्रति तस्य पुत्रीनिर्विशेषवात्सल्यस्य औचित्यपूर्णा वर्णाना अत्र दृश्यते। प्रस्थानवेलायां शकुन्तलां प्रति समर्पितानि आशीर्वचनानि लोकवृत्तानुकरणं नाट्यं इत्याध्युक्तीनां निदर्शनं भवति।

अभिज्ञानशाकुन्तले अतिप्रौढः भवति पञ्चमोऽङ्कः ।

चन्द्रवंशीयानांधर्मदीक्षा,प्रजापालनक्षमता,असत्यभीरुता,संशुद चिन्ता इत्यादयः औचित्यानुसारं वर्णिता।

" वशिनां हि परपरिग्रहसंश्लेष पराङ्मुखीवृत्तिः"।१५ इत्यादि दुष्यन्तवचनेषु आत्मविश्वासोऽपि प्रतिफलति।

षष्ठेऽङ्के वर्णितःअङ्गुलीयकवृत्तान्तः कथाधटनायाम् अतिमहत्वमावहति।अनेन वृत्तान्तेन राज्ञःधर्मच्युतिः विनश्यति।अङ्गुलीयकप्रत्यभिज्ञानेन दुःखपरवशता,वसन्तोत्सवप्रत्याख्यानं, शकुन्तलायाः चित्र दर्शनेन समाश्वासनं,तामुद्दिश्य विलपनं इत्यादीनां वर्णनं दुष्यन्तस्य प्रणयोचितं भवति। देवविजयार्थं अस्य प्रयाणमपि सन्दर्भोचितमस्ति। दुष्यन्तःचन्द्रवंशजातः भवति।तस्य प्रणयविह्वलता अनुचिता इत्यतः अस्मिन् सन्दर्भे मातलिना तस्य युद्धोध्युक्तता कृता। इतिवृत्तघटनायां अस्य अति प्राधान्यमस्ति।

सप्तमोऽङ्के स्वर्गतःप्रतिनिवृत्तस्य दुष्यन्तस्य प्रजापत्याश्रमप्रवेशः कविना नाटकस्य शुभपर्यवसानोचितरूपेण सन्निवेशितः।पुत्रदर्शनेन संजायमानःआह्लादातिशयः चन्द्रवंशस्यापि दीप्तिं प्रकाशयति।

"महस्तेजोबीजं बालोऽयं प्रतिभाति मे

स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः"।।१६ इत्यादिना तदभिव्यज्यते। मुनेः मारीचस्य आशीर्वचनमपि चन्द्रवंशस्यअभ्युदयायऔचित्यरूपेण सन्निवेशितम्।पत्नीपुत्रप्रत्यभिज्ञानेन शुभपर्यवसायी भवति अभिज्ञानशाकुन्तलम्।

अभिज्ञानशाकुन्तले अङ्गीरसः भवति श्रृङ्गारः। किन्तु अत्र सर्वरसाणां रमणीयपरिपाकःपरिलक्ष्यते।मार्मिकभावाभिव्यञ्जनया,उदात्त कोमलकल्पनया,प्रज्वलपदविन्यासेन च औचित्यपूर्णं भवति अभिज्ञानशाकुन्तलम् । एवं रूपकेऽस्मिन् सर्वत्र व्याप्तं भवति औचित्यम्।कविना औचित्यं रससिद्धस्यापि काव्यस्य जीवितमिति साधितम्।

## सहायकग्रन्थाः


१ औचित्यविचारचर्चा ३

२ औचित्यविचारचर्चा ५

३ नाट्यशास्त्रम् २६/११९

४ नाट्यशास्त्रम् १४/६८

५ ध्वन्यालोकः३/६

६ ध्वन्यालोकः३/१४

७ ध्वन्यालोकः३/१०

८ ध्वन्यालोकः३/३३

९ वक्रोक्तिजीवितम् १/३५

१० व्यक्तिविवेकः पृ०१५२


श्लोकसूची।


१ अभिज्ञानशाकुन्तलम्(विमला-चन्द्रकला व्याख्यानोपेतः) १/५

२ अ.श.२/६

३ अ.श.१/७

४ अ.शा.१/१८पुटे

५ अ.शा.१/२२

६ अ.शा.१/२६

७ अ.शा.१/२

८ अ.शा.२/१०

९ अ.शा.१/३०

१०अ.शा.३/१२

११ अ.शा.३/२४

१२ अ.शा.४/१६

१३ अ.शा.४/१७

१४ अ.शा.४/५

१५ अ.शा.५/२८

१६ अ.शा.७/१५